Total Pages 08

Name 13 · 02 · 19

Roll no. .................

# DELHI PUBLIC SCHOOL, VINDHYANAGAR

## PRE-BOARD EXAM (2018-19) – II

CLASS – X M. M. - 80

SUBJECT – संस्कृत Time: 3 hrs

### खण्ड : 'क'

अपठित-अवबोधनम् – (10 अङ्का:)

प्र0 1 अधोलिखितम् अनुच्छेदं पठित्वा प्रश्ननानाम् उत्तराणि लिखत –

एकस्य भिक्षुकस्य भिक्षापात्रे अञ्जलिपरिमिताः तण्डुलाः आसन् । सः ईश्वरम् अवदत् - ''भगवन् ! दयां कुरु । कथम् अनेन उदरपूर्ति भविष्यति । तदैव '' अन्यः भिक्षुकः तत्र आगच्छति वदति ''च भिक्षां देहि '' क्रुद्धः प्रथमः भिक्षुकः अगर्जत् – रे भिक्षुक! भिक्षुकमेव भिक्षां याचसे ? तव लज्जा नास्ति ? द्वितीयः भिक्षुकः उक्तवान् - तव भिक्षापात्रे अञ्जलिपरिमिताः तण्डुलाः , मम तु पात्रं रिक्तम् । दयां कुरु । अर्धं देहि । प्रथमः भिक्षुकः तत् न स्वीकृतवान् । द्वितीयः भिक्षुकः पुनः अवदत् -भोः कृपणः मा भव । केवलम् एकं तण्डुलं देहि । प्रथमः भिक्षुकः तस्मै एकम् एव तण्डुलं ददाति । द्वितीये भिक्षुके गते सति प्रथमः भिक्षुकः भिक्षापात्रे तण्डुलाकारं स्वर्णकणं पश्यति । आश्चर्यचकितः शिरःताडयन् सः पश्चातापम् अकरोत् - धिक् माम् धिक् मम मूर्खताम् । ''

I एकपदेन उत्तरत - ( केवलं प्रश्नचतुष्टयम् ) ½ x 4 = 2

1) कस्य भिक्षुकस्य भिक्षापात्रं रिक्तम् आसीत् ?
2) धिक् माम् इति कः वदति ?
3) द्वितीयः भिक्षुकः अन्ते कति तण्डुलान् याचते ?
4) प्रथमः भिक्षुकः दानी आसीत् अथवा कृपणः ?
5) प्रथमः भिक्षुकः भिक्षापात्रे किं पश्यति ?

II पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

1 ) प्रथमः भिक्षुकः ईश्वरम् किम् अवदत् ?
2) द्वितीयः भिक्षुकः एकस्य तण्डुलस्य कृते किं ददाति ?
3) आश्चर्यचकितः भिक्षुकः किम् अकरोत् ?

III यथानिर्देशम् उत्तरत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

1) **अञ्जलिपरिमिताः** ' इति पदस्य विशेष्यपदं किम् ?

(अ) भिक्षुकाः (ब) कृपणाः (स) तण्डुलाः

2 ) **मम तु पात्रं रिक्तम्** अत्र **मम** पदे का विभक्तिः?

(अ) षष्ठी (ब) सप्तमी (स) द्वितीया

3) **दयां कुरु** ' इति कः कं कथयति ?

(अ) द्वितीयः भिक्षुकः ईश्वरम् (ब) प्रथमः भिक्षुकः ईश्वरम् (स) प्रथमः भिक्षुकः द्वितीयम्

4) **प्रसन्नः** इति पदस्य किं विलोम पदं प्रयुक्तम् ?

(अ) दयालुः (ब) धिक् (स) क्रुद्धः

5) **अकरोत्** इति पदस्य कर्तापदं किम् ?

(अ) अन्यः (ब) सः (स) भिक्षुकः

**IV** एतस्याः लघुकथायाः शीर्षकं लिखत । 2

## खण्ड : ख

**रचनात्मककार्यम्** - ( **15** अङ्काः )

प्र0 2 भवतः नाम रूपचन्द्रः अस्ति। भवान् छात्रावासे वसति। छात्रावास-जीवनविषयम् अधिकृत्य पितरं प्रति लिखिते पत्रे मञ्जूषातः शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। ½ x 10 = 5

छात्रावासात्

तिथिः ---------

___(i)___ !

सादरं नमोनमः।

प्रस्थानकाले भवान् छात्रावासस्य दिनचर्यायाः विषये लिखितुम् अकथयत् । छात्रावासस्य ___(ii)___ अनुशासनपूर्णं भवति। अत्र ___(iii)___ कार्याणि यथाकालं भवन्ति। व्यायामस्य ___(iv)___ व्यायामः, पठनस्य समये ___(v)___, खेलनस्य समये च खेलनम्। अत्र ___(vi)___ अपि सुप्रबन्धः। प्रांगणे मित्रैः सह यदा कदाचित् स्थित्वा ___(vii)___ अपि अनुभवामि। तत्र भवता मम कापि चिन्ता न ___(viii)___ । ___(ix)___ प्रणामः।

भवतः ___(x)___

रूपचन्द्रः

मञ्जूषा

(सर्वाणि , पठनम् , पानाशनयोः , समये , कार्या , गोष्ठीसुखम् , जीवनम् , पूज्यपादपितः , पुत्रः , मातृपादयोः)

प्र0 3 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि लिखत। **10**




मंजूषा

मैट्रोरेल–स्थानकम् , जनाः , विद्युच्चालितयानम् , तीव्रगामी , वातानुवकूलितम् , अल्पसमये , सुखदयात्रा , अस्माकम , गौरवम् , अति , सुन्दरम् ,, अनुभवन्ति ,

## खण्डः 'ग'

## अनुपयुक्तव्याकरणम् ( 25 अङ्काः )

प्र0 4 अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत- ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) राजा **यथा + उचितम्** न्यायं करोति ।

(ii) ईश्वरः एकः **भवति** ।

(iii) **वनेऽस्मिन्** सिंहः अवसत् ।

(iv) अहं भवते चक्षुर्द्वयम् एव यच्छामि।

(v) **त्यागाच्छान्तिः** लभते ।

प्र05 अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।( केवलं प्रश्नचतुष्टयम् ) 4

(i) **यथासमयं** सर्वेषां महत्त्वम् विद्यते ।

(अ)समयम् अनतिक्रम्य (ब) समयः अनतिक्रम्य (स) समयं यथा

(ii) एषः कलहः **विनाशकारणं** भविष्यति ।

(अ) विनाशं कारणम् (ब) विनाशेन कारणम् (स) विनाशस्य कारणम्

(iii) दशाननः लंकायाः अधिपतिः आसीत्।

(अ) दशानि आननानि यस्य सः (ब) दशं आननानि (स) दश आननानि यस्य सः

(iv) हंसस्य पक्षाः **दुग्धधवलाः** भवन्ति ।

(अ) दुग्धम् इव धवलाः (ब) दुग्धाः धवलाः (स) दुग्धमेव धवलाः

(v) शतानाम् अब्दानां समाहारः किं कथ्यते ?

(अ) शताब्दम् (ब) शताब्दी (स) शताब्दः

प्र06 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं लिखत।

( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) मे दग्धाः घोटकाः कथं **रक्ष् + अनीयर्** ।

(अ) रक्षणीया (ब) रक्षणीया : (स) रक्षणीयः

(ii) गुरुं **सेव् + शानच्** छात्रः प्रसन्नः अस्ति।

(अ)सेवमानः (ब) सेवमानौ (स) सेवमाना

(iii) अहो ! **विज्ञानमयी** एषा गणना ।

(अ) विज्ञानमय + ङीप् (ब) विज्ञानमय + ई (स) विज्ञानमय + टाप्

(iv) **मतिमान्** एव धनवान् भवितुं शक्यते ।

(अ) मति + मान् (ब) मति + मतुप् (स) मति + मत्

(v) कार्याणि **कुर्वन्तः** श्रमिकाः गायन्ति।

(अ) कृ + शानच् (ब) कृ + शतृ (स) कृ + मतुप्

प्र0 7 अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत। 1 x 3 = 3

निरूपमा – विनीते ! अधुना किं करोषि ?

विनीता – (i) ----------- नवीनं नुस्तकं मणिका पठ्यते ।

(अ) मया (ब) त्वया (स) तेन

निरूपमा – त्वं अधुना कस्यां कक्षायां (ii) .............. ?

(अ) पठ्यते (ब) पठामि (स) पठसि

विनीता – मया तु नवमकक्षायां (iii) ---------- ।

(अ) पठामि (ब) पठ्यते (स) पठ्ये

**अथवा**

प्र0 7 अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत –

(i) छात्रः पुस्तकानि पठति ।
(ii) वयं उद्यानम् गच्छामः ।
(iii) वानरैः पत्राणि खाद्यन्ते ।

प्र0 8 अधोलिखितेषु वाक्येषु अङ्कानां स्थाने संस्कृतसंख्यापदानि लिखत। ( केवलं प्रश्नचतुष्टयम् ) ½ x 4 = 2

(i) राधा प्रातः 5.45 वादने उत्तिष्ठति।
(ii) 7.30 वादने सा विद्यालयम् गच्छति।
(iii) गृहमागत्य 12.00 वादने भोजनं करोति।
(iv) सायं 4.15 वादने दूरदर्शनम् पश्यति।
(v) रात्रौ 8.30 वादने गृहकार्यं करोति।

प्र0 9 मञ्जूषायाः उचितम् अव्ययपदानि चित्वा वाक्येषु रिक्तस्थानानि पूरयत। ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

मञ्जूषा – **किमर्थम् , कदा , अद्य , श्वः , तत्र**

मोहनः – ................ अहम् दिल्लीनगरं गन्तुम् इच्छामि ।
माता – त्वं ........................ गन्तुम् इच्छसि ?
मोहनः – ..................... गत्वा गणतन्त्रोत्सवं पश्यामि ।
माता – गणतन्त्रोत्सवः ......................... भविष्यति ।
मोहनः – ..................... एव भविष्यति ।

प्र0 10 रेखाङ्कितपदानां संशोधनं कृत्वा लिखत – ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) आवाम् चलचित्रं **पश्यामि** ।
(ii) राधिका लेखान् **लेखिष्यसि** ।
(iii) मम भवनम् **विशालः** अस्ति ।
(iv) हयः गायकः गीतं **गायति** ।
(v) **युवाम्** कुत्र गमिष्यसि ?

## खण्ड : 'घ'

## पठित–अवबोधनम् – 30 अङ्काः

प्र011 अधोलिखित गद्याशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

कालोऽहम्। अहं खलु कालः विश्वस्य आत्माऽहम्। कलयामि गणयामि जगतः आयुःप्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं सर्वदा विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयं, 'कियती प्राचीना इयम् सृष्टिः!' नैव तर्हि श्रृणुत ध्यानेन ।

I. एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1x2=2

(i) चक्रवत् कः परिवर्तते ?

(ii) विश्वस्य आत्मा कः ?

(iii) कालः कस्य आयुः गणयति ?

II पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नमेकम् ) 2 x 1 = 2

(i) कालः केषां साक्षी अस्ति ?

(ii) कालः कथं क्रियाकलापं पश्यति ?

III. निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नचतुष्टयम्) ½ x 4 = 2

(i) 'विश्वस्य आत्माऽहम्' अत्र अहम् सर्वनामपदं कस्मै प्रयुक्तम्?

(अ) जगते (ब) उत्पत्तये (स) कालाय

(ii) अहम् 'सर्वदा विद्यमानः' अत्र विशेषणपदं चित्वा लिखत।

(अ) सर्वदा (ब) विद्यमानः (स) सर्व

(iii) **जायते** इति पदस्य विलोमपदं किम्?

(अ) उत्पत्तेः (ब) सततं (स) विलीयते

(iv) **दृश्यमाणः** इत्यर्थे अत्र कः शब्दः प्रयुक्तः ?

(अ) जानीथ (ब) वीक्षमाणः (स) परिवर्तमानः

(v) **नैव तर्हि श्रृणुत ध्यानेन** अत्र क्रिया पदं किम् ?

(अ) श्रृणुत (ब) इयम् (स) तर्हि

प्र012. अधोलिखित पद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति !
व्ययतो वृद्धिमायाति क्षयमायाति संचयात् ।।

I. एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1x2=2

(i) सरस्वत्याः कोशः कथं वर्धते ?

(ii) अस्मिन् श्लोके सम्बोधन पदं किम् ?

(iii) अपूर्वः कः ?

II पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नमेकम् ) 2 x 1 = 2

(i) विद्या कथं क्षयमायाति ?

(ii) भारत्याः कोशः कथं अपूर्वः ?

III. निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नचतुष्टयम्) ½ x 4 = 2

(i) **विद्यते** इति क्रियायाः कर्तृपदं किम् ?

(अ) अपूर्वः (ब) कोशः (स) तव

**(ii) वृद्धि** इति पदस्य विलोमपदं किम् ?

(अ) कोशः (ब) व्यय (स) क्षय

**(iii) संचयात्** पदे का विभक्तिः ?

(अ) पंचमी (ब) सप्तमी (स) तृतीया

**(iv)** अत्र **अस्ति** इत्यर्थे किं पदं प्रयुक्तम् ?

(अ) आयाति (ब) वर्तते (स) विद्यते

**(v) वृद्धिमायाति** अत्र अस्ति ?

(अ) सन्धिः (ब) संयोगः (स) किमपि नास्ति

प्र013 अधोलिखित नाट्याशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

युधिष्ठिरः – सम्प्रति आश्वस्तः अस्मि । मन्ये अश्वत्थामा ब्रह्मास्त्रप्रयोगं न करिष्यति ।
श्रीकृष्णः – तर्हि न जानासि तस्य मनोवृत्तिम् । पितुः उपदेशेन असन्तुष्टः स एकदा द्वारकापुरीम् आगच्छत् । ब्रह्मास्त्रं दत्वा सः सुदर्शनचकम् अवांछत् ।
युधिष्ठिरः – (साश्चर्यम् ) कथं चकम् इति !
श्रीकृष्णः – आम् ! मया कथितम् । नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि । यदि त्वं मम गदां ,शक्तिं , धनुः , चकं वा इच्छसि , तुभ्यं ददामि ।
युधिष्ठिरः – ततस्ततः
श्रीकृष्णः – स तु चकम् एव अयाचत् । गृहाण चकम् इति उक्तः सः सव्येन पाणिना चकं गृहीतवान् । किन्तु तत् चकं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत् ।

I. एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1x2=2

(i) अश्वत्थामा कृष्णाय ब्रह्मास्त्रं दत्वा किं अवांछत् ?

(ii) द्रोणपुत्रः चकं किं कर्तुम् असमर्थः अभवत् ?

(iii) सव्येन पाणिना कः चकं गृहीतवान् ?

II पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नमेकम् ) 2 x 1 = 2

(i) श्रीकृष्णः द्रोणपुत्राय किं किं दातुं कथयति ?

(ii) पितुः उपदेशेन असन्तुष्टः अश्वत्थामा किमकरोत् ?

III. निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नचतुष्टयम्) ½ x 4 = 2

**(i) अयाचत्** इति कियायाः कर्तृपदं किम् ?

(अ) तु (ब) सः (स) चकम्

**(ii) तत् चकम्** अत्र विशेष्य पदं किम् ?

(अ) तत् (ब) तत्चकम् (स) चकम्

**(iii) उपदेशेन** पदे का विभक्तिः ?

(अ) तृतीया (ब) सप्तमी (स) पंचमी

**(iv) संचालयितुम्** पदे कः प्रत्ययः ?

(अ) त्व (ब) तुम् (स) तुमुन्

**(v) गृहीत्वा** अस्य विलोम पदं किम् ?

(अ) त्यक्तः (ब) दत्वा (स) अवांछत्

प्र014 प्रश्ननिर्माणं कुरुत – ( केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4

(i) अस्मिन् अवसरे **सामाजिकं** कार्यं कियते ।

(ii) **काकः** छात्राणाम् कृते आदर्शः ।

(iii) पठनस्य **षट्** गुणाः भवन्ति।

(iv) 'ओणम' इति केरलराज्यवासिनाम् प्रसिद्धं पर्व अस्ति।

(v) अश्वाः **प्राणत्राणाय** इतस्ततः अधावन् ।

प्र015 अधोलिखितश्लोकयोः अन्वयम् उचितपदैः पूरयत। ½ x 4 = 2 + ½ x 4 = 2

मञ्जूषा – ( सर्वः , चञ्चुदेशे , कामान् , गात्रं , सर्वत्र , भद्राणि , ग्रथितं , एकैकपक्षे )

(i) काकस्य गात्रं यदि काञ्चनस्य, माणिक्यरत्नं यदि चञ्चुदेशे।
एकैकपक्षे ग्रथितं मणीनां, तथापि काको न तु राजहंसः ।।

अन्वयः – यदि काकस्य ___(i)___ काञ्चनस्य, (भवेत्) यदि ___(ii)___ माणिक्यरत्नम् (स्यात्) ___(iii)___ मणीनाम् ___(iv)___ (भवेत्) तथापि काकः (एव) राजहंसः तु न।

(ii) सर्वस्तरतु दुर्गाणि, सर्वो भद्राणि पश्यतु।
सर्वः कामानवाप्नोतु, सर्वः सर्वत्र नन्दतु।।

अन्वयः– ___(i)___ दुर्गाणि तरतु सर्वः ___(ii)___ पश्यतु। सर्वः ___(iii)___ अवाप्नोतु सर्वः च ___(iv)___ नन्दतु।

प्र016 रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थम् चित्वा लिखत। ( केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4

(1) आचार्यात् पादमादत्ते **पादं** शिष्यः स्वमेधया ।

(i) चरणम् (ii) चतुर्थांशम् (iii) श्लोकस्य पंक्तिम्

(2) अहर्निशं **महानशं** प्रविश्य यत् पश्यति तद् भक्षयति ।

(i) अश्वशालाम् (ii) पाकशालाम् (iii) महाशलाम्

(3) सः यूथपः सर्वान् कपीन् आहूय **रहसि** अवदत् ।

(i) एकान्ते (ii) रहस्ये (iii) अन्ते

(4) **समन्तात्** वर्धमानाः अनलशिखाः आकाशं लिहन्ति ।

(i) समस्तः (ii) परितः (iii) सामान्यतः

(5) **शैलानां** पारं द्रष्टुं समर्थः भव इति।

(i) मनुष्याणाम् (ii) पर्वतानाम् (iii) नराणाम्

0000000000000000000